श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ तिरुमन्दिरच्चुरुक्कु ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तिरुमन्दिरच्चुरुक्कु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

निर्वेदात् प्रविधावनात् अटयितर्यज्ञानवार्धौ चिरं
मग्नाः ! विह्वलिताः उपेत्य रसनोल्लासागमा एकताम्।
एकैव श्रुतिरेकवर्णकलितेवानन्ददात्रादिमे
वर्णे च प्रणवस्य निर्मलमहामण्येकशीलावनम्॥ **1.1** ॥

व्यक्तं तात्पर्यमेवं हीत्यनुसन्धाय मानसे।
स्थिरीकुरुत निर्बाधं अकारार्थविमर्शनम्॥ **1.2** ॥

आत्मा स्वस्मै स्वतन्त्रस्त्वितिविमतमनीषैकनिष्ठाः प्रगाढात्
मोहात् क्रूराघलोकान् अधिवसनपराः ! द्योतयन्तीमवर्णम्।
संयोज्यापोह्य सार्थां समवनकृदकारस्य तुर्यां विभक्तिं
शेषत्वं चाभ्युपेता अशिथिलमिह सञ्जीवतात्यन्तपूताः॥ **2** ॥

त्यक्तोक्ताकारवाच्या व्यपगतविभवा ये विनश्यन्ति भूयः
जायन्ते चेदृशानां प्रणमितशिरसः पादयोः प्रीत्यपेताः।
यातारोऽधश्च मर्त्याः ! भगवदितरशेषत्वरिक्ता उदारान्
वेदार्थान् ध्यायमाना अखिलफलमिदं हीति राराजतेह॥ **3** ॥

नित्याश्लिष्टानवद्यौ दिनमणिरिव भा चैकभावौ पती नः
त्यक्त्वा लोकावितारौ कृतपरिचरणा मानवाः ! विष्णुमात्रे।

एकीभूतत्रिवर्णात्मकपदगतयोर्वर्णयोस्सारमर्थं
ध्यायं ध्यायं प्रबुद्धाः विमृशत सततं सन्त उज्जीवतेह ॥ 4 ॥

तत्त्वेभ्यष्षड्वतुर्भ्योऽप्यपरमनुपमात् ब्रह्मणोऽन्यं परस्मात्
आत्मानं नावगत्य क्वचिदपि कथमप्यात्तसञ्जातबोधाः।
मर्त्याः ! पिच्छोपमानाः पृथगकृतमकारार्थकं तं प्रदीपं
कृत्वाथात्मीयदास्यं ह्यनुभवत परे पुंसि चामोदयध्वम् ॥ 5 ॥

स्वार्थायत्ताखिलस्वः स्वयमिह सकलाधीश आश्चर्यचर्यः
यौष्माकीणं किलेदं त्विति किमपि न दत्तं च वः पारतन्त्र्यम्।
मध्येमन्त्रं विभिन्नं "नम" इति "मन" इत्येत्य सर्वं मदीयं
स्वाम्यस्मीत्यज्ञतां च व्यपनयत बलैनांसि च ध्वंसयध्वम् ॥ 6 ॥

नित्यानां निखिलात्मनां सुमतिदो भास्वान् सहस्रांशुवत्
दुर्मार्गाद्विनिवारकोऽद्भुतवपुः नित्यस्समस्ताधिपः।
विश्वं न्यस्यति निश्चलं स्वजठरे काले बहिर्न्यस्यति
श्रीशो यश्च विमृश्य संश्रयत तं नारेति शब्दे नराः ! ॥ 7 ॥

शास्त्रीयं वचनं सदोपदिशतामङ्घ्री गुरूणां दृढौ
नन्तुं वीतनिजान्तरङ्गनयना दुर्मानिनो व्रीडिताः।
गाढध्वान्तचिरोषिताः ! अयनतां प्राप्तोऽखिलानां च यः
यस्यैतेऽयनमीदृशं फलममुं नाथं परं गायत ॥ 8 ॥

सङ्कल्पस्यानुरूपा बहुविधवरिवस्या उपास्याः परस्य
पुंसो विस्मृत्य पञ्चेन्द्रियमरिचरणव्याकुलीभूतमर्त्याः !।
व्याप्येदं यस्समस्तं विधरति परमस्तस्य नारायणेति
प्राह्वे चित्रां दिशन्तीं परिचरणविधिं चाद्रियध्वं विभक्तिम् ॥ 9 ॥

अष्टास्वाशासु येषां सुचरितसुगुणा व्यापृता देशिकैस्तैः
उक्तेष्वस्माकमष्टास्वतनवमिह चार्थान् नवाहं यथावत्।
चित्तारूढानुभूता अभिदधत इवानादिवेदाभिगुप्तं
न्यासं न ब्रूयुरेतान् प्रकटनमनसो वा न दृश्यन्त एव॥ **10**॥

श्रीदेशिकप्रबन्धस्थः "तिरुमन्त्रार्थसङ्ग्रहः"।
गोपालार्येण सश्लोकस्सार्थोऽतन्यत सन्मुदे॥

॥ इति तिरुमन्त्रार्थसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥